बाल ग्रह रक्षा स्तोत्रं

बालग्रहरक्षास्तोत्रं

आदाय कृष्णं संत्रस्ता यशोदापि द्विजोत्तम |
गोपुच्छं भ्राम्य हस्तेन बालदोषमपाकरोत् || 1 ||

गोकरीषमुपादाय नंदगोपोऽपि मस्तके |
कृष्णस्य प्रददौ रक्षां कुर्वित्येतदुदीरयन् || 2 ||

नंदगोप उवच –
रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः |
यस्य नाभिसमुद्भूतपंकजादभवज्जगत् || 3 ||

येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् |
वराहरूपदृग्देवस्सत्त्वां रक्षतु केशवः || 4 ||

नखांकुरविनिर्भिन्न वैरिवक्षःस्थलो विभुः |
नृसिंहरूपी सर्वत्र रक्षतु त्वां जनार्दनः || 5 ||

वामनो रक्षतु सदा भवंतं यः क्षणादभूत् |
त्रिविक्रमः क्रमाक्रांतत्रैलोक्यस्स्फुरदायुधः || 6 ||

शिरस्ते पातु गोविंदः कठं रक्षतु केशवः |
गुह्यं सजठरं विष्णुर्जंघे पादौ जनार्दनः || 7 ||

मुखं बाहू प्रबाहू च मनस्सर्वेंद्रियाणि च |
रक्षत्वव्याहतैश्वर्यस्तव नारायणोऽव्ययः || 8 ||

शंखचक्रगदापाणेश्शंखनादहताः क्षयं |
गच्छंतु प्रेतकूष्मांडराक्षसा ये तवाहिताः || 9 ||

त्वां पातु दिक्षु वैकुंठो विदिक्षु मधुसूदनः |
हृषीकेशोऽंबरे भूमौ रक्षतु त्वां महीधरः || 10 ||

श्रीपराशर उवाच –

एवं कृतस्वस्त्ययनो नंदगोपेन बालकः |

शायितश्शकटस्याधो बालपर्यंकिकातले || 11 ||

वनमाली गदी शार्ङ्गी शंखी चक्री च नंदकी |

श्रीमान्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु || 12 ||

श्रीश्रीश्शुभं भूयात् |

इति बालग्रहरक्षा स्तोत्रं |